इति वैद्यकपथ्यापथ्यविधिः ॥) समस्तिलत्वचः । शियुत्वचः । इति राजनिर्घण्टः । (भावे घञ् ।) दंशनम् ॥

उपदर्शकः, पुं, (उपदर्शयतीति । उप + दृश् + णिच् + ण्वुल् ।) द्वारपालः । इत्यमरटीकासारसुन्दरी ॥ (दर्शयितरि, त्रि ॥)

उपदा, स्त्री, (उपदीयते इति । उप + दा + आत-श्चोपसर्गे इत्यङ् ।) उपढौकनम् । इत्यमरः ॥ ("उपदा विविशुः शश्वत् नोत्सेकाः कोशलेश्वरम्" । इति रघुः । ४ । ७० ।)
"प्रत्यर्प्य पूजामुपदाच्छलेन" । इति रघुः । ७।३०।)

उपदानकं, क्ली, (उपदान + स्वार्थे कन् ।) उत्कोचः । इति त्रिकाण्डशेषः ॥

उपदिष्टः, त्रि, (उप + दिश् + क्त ।) उपदेशप्राप्तः । यथा । "ननु शूद्रस्यापि सगोत्रा कथं न निषिध्यते इति चेदत्र उपदिष्टातिदिष्टगोत्रस्यैव निषेधो न त्वतिदिष्टातिदिष्टशूद्रगोत्रादेरिति" । इत्युद्वाहतत्त्वम् ॥

उपदी, स्त्री, (उपेत्य दीयते छिद्यते इति उप + दो + क + ङीष् ।) वन्दाकः । इति राजनिर्घण्टः ॥ परगाछा इति भाषा ॥

उपदेवता, स्त्री, (उपगता सादृश्येन देवताम् ।) यक्षभूतादिः ॥ (उपदेवताश्च दश । यथाह अमरः ।
"विद्याधरोऽप्सरो यक्षो रक्षो गन्धर्व्वकिन्नरौ ।
पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः" ॥)

उपदेशः, पुं, (उप + दिश् + घञ् ।) मन्त्रकथनम् । तत्पर्य्यायः । दीक्षा २ । यथा ।
"चन्द्रसूर्य्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये ।
मन्त्रमात्रप्रकथनमुपदेशः स उच्यते" ॥
इति रामार्च्चनचन्द्रिका ॥ कलावत्यादिदीक्षायासमार्थ्ये संक्षेपो यथा ।
"तत्राप्यशक्तः कश्चिचेदभ्यर्च्च्य साम्प्रतम् ।
तदम्बुनाभिषिच्याष्टवारं मूलेन केकरम् ॥
निधायाष्टौ जपेत् कर्ण उपदेशे त्वयं विधिः" ॥
इति विश्वसारतन्त्रम् ॥ हितकथनम् ।
(यथा, हितोपदेशे विग्रहे उक्तम् ।
"उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये" ॥)
शिक्षणम् ॥ (यथा, मनुः ८ । २७२ ।
"धर्म्मोपदेशं दर्पेण विप्राणामस्य कुर्व्वतः" ।
"यवमित्युपदेशः । यथा । तथा न जागृयात् रात्रौ दिवास्वप्नञ्च वर्जयेदनेन कारणेनेत्युपदेशः ॥ अयोपदिश्यते मधुरेण श्लेष्माभिवर्द्धत इति" । इति सुश्रुते उत्तरतन्त्रे ६५ अध्यायः ॥)

उपदेशी, [न्] त्रि, (उपदिशति यः । उप + दिश् + णिनि ।) उपदेष्टा ॥ (यथा हितोपदेशे मित्रलाभे ।
"गतानुगतिको लोकः कुट्टनीमुपदेशिनीम् ।
प्रमाणयति नो धर्म्मे यथा गोघ्नमपि द्विजम्" ॥)

उपदेष्टा, [ऋ] त्रि, (उपदिशति यः । उप + दिश् + तृच ।) उपदेशकर्त्ता । यथा ।
"तथोपदेष्टारमपि पूजयेच्च ततो गुरुम् ।
न पूज्यते गुरुर्यत्र नरैस्तत्राफला क्रिया" ॥
इति तिथ्यादितत्त्वम् ॥ बृहस्पतिः ।
"उपदेष्टानुमन्ता च लोके तुल्यफलौ स्मृतौ" ।
इत्याह्निकतत्त्वञ्च ॥

उपदेहिका, स्त्री, (उपदेहो विद्यते यस्याः । उपदेह + ठक् ।) कीटविशेषः । तत्पर्य्यायः । उपजिह्वा २ वम्री ३ उपदीका ४ । इति हेमचन्द्रः ॥

उपद्रवः, पुं, (उप + द्रु + अप् ।) उत्पातः । इति हलायुधः ॥ रोगारम्भकदोषप्रकोपजन्योऽन्यो विकारः । (तल्लक्षणमुक्तं वैद्यके । यथा,—
"यो व्याधिस्तस्य यो हेतुर्दोषस्तस्य प्रकोपतः ।
योऽन्यो विकारो भवति स उपद्रव उच्यते" ॥
"व्याधेरुपरि यो व्याधिः उपद्रव उदाहृतः ।
सोपद्रवा न जीवन्ति जीवन्ति निरुपद्रवाः" ॥
इति हारीते चिकित्सितस्थाने द्वितीयेऽध्याये ।
"तत्रौपसर्गिको यः पूर्व्वोत्पन्नं व्याधिं जघन्यकालजातो व्याधिरुपसृजति स तन्मूलएवोपद्रवसंज्ञः" । इति सुश्रुते सूत्रस्थाने ३५ अध्याये ॥)

उपद्रष्टा, [ऋ] त्रि, (उप + दृश् + बाहुलकात् तृच ।) उपदर्शकः । उदासीनबोधरूपत्वेन गुणप्रचारदर्शी । इति गीताटीका ॥
("उपद्रष्टानुमन्ता च भर्त्ता भोक्ता महेश्वरः" । इति गीतायां १३ । २२ । साक्षी पुरुषः । यथा,
"ऋत्विग्यजमानेषु यजनकर्म्मण्यापृतेषु तत्समीपस्थोऽन्यः स्वयमव्यापृतो यज्ञविद्याकुशलत्वात् ऋत्विग्यजमानव्यापारगुणदोषाणां ईक्षिता तद्वत् कार्य्यकारणव्यापारेषु स्वयमव्यापृतो विलक्षणस्तेषां कार्य्यकारणानां सव्यापाराणां समीपस्थो द्रष्टा उपद्रष्टा साक्षी पुरुषः" ॥)

उपधर्म्मः, पुं, (उपहीनोधर्म्मः ।) पाषण्डः । इति श्रीभागवतम् ॥ (यथा मनुः २ । २३७ ।
"एष धर्म्मः परः साक्षात् उपधर्म्मोऽन्य उच्यते" ॥)

उपधा, स्त्री, (उपधीयते शुद्धिज्ञानमत्र । उप + धा + आतश्चोपसर्गे इत्यङ् + टाप् ।) राज्ञां धर्म्मकामार्थभयैरमात्यादेर्यत् परीक्षणम् । इत्यमरः ॥ धर्म्मार्थकाममोक्षद्वारा परीक्षा । यथा ।
"धर्म्मार्थकाममोक्षैश्च प्रत्येकं परिशोधनैः ।
उपेत्य धीयते यस्मादुपधा परिकीर्त्तिता ॥
अर्थकामोपधाभ्यान्तु भार्य्याः पुत्रांस्तु शोधयेत् ।
धर्म्मोपधाभिर्व्विप्रांस्तु सर्व्वाभिः सचिवान् पुनः" ॥
इति कालिकापुराणे ८५ अध्यायः ॥ ("भूयोभूयः सोपधाभिर्विशोध्य तं मे मतिसहायमकरवम्" । इति दशकुमारचरिते विश्रुतचरिते ।) पदानामुपान्त्यवर्णः । इति व्याकरणम् ॥

उपधातुः, पुं, (उप सादृश्ये । धातुसदृशो धातुः ।) अप्रधानधातुसदृशधातुः । स तु सप्तधा यथा । माक्षिकम् १ तुत्थकम् २ अभ्रम् ३ नीलाञ्जनम् ४ मनःशिला ५ हरितालम् ६ रसाञ्जनम् ७ ॥ शरीरस्थधातुभवोपधातुः सप्तधा यथा । रसात् स्तनदुग्धम् १ रक्तात् रजः २ मांसात् वसा ३ मेदसो घर्म्मः ४ अस्थ्नो दन्ताः ५ मज्ज्ञः केशाः ६ शुक्रात् ओजः ७ । इति वैद्यकम् ॥
("स्तन्यं रजश्च नारीणां काले भवति गच्छति ।
शुद्धमांसभवस्नेहः सा वसा परिकीर्त्तिता ॥
स्वेदो दन्तास्तथा केशास्तथैवौजश्च सप्तमम् ।
इति धातुभवा ज्ञेया एते सप्तोपधातवः" ॥
इति शार्ङ्गधरेण पूर्व्वखण्डे पञ्चमेऽध्याये उक्तम् ॥
"सप्तोपधातवः स्वर्णमाक्षिकं तारमाक्षिकम् ।
तुत्थं कांस्यं च रीतिश्च सिन्दूरश्च शिलाजतु" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)

उपधानं, क्ली, (उपधीयते आरोप्यते मस्तकमत्र । उप + धा + अधिकरणे ल्युट् ।) शिरोधानम् ॥ बालिश इति भाषा । तत्पर्य्यायः । उपबर्हः २ । इत्यमरः । गण्डुः ३ । इति जटाधरः ।
("सोपधानां धियं धीराः श्रेयसीं खट्टयन्ति ये" । इति माघः २।७७ । "पट्टोपधानाध्यासितशिरोभागेन" । इति कादम्बरी ।) विषम् । प्रणयः । इति मेदिनी । व्रतम् । इति हेमचन्द्रः ॥

उपधानीयं, क्ली, (उपधीयते यस्मिन् । उप + धा + अनीयर् ।) उपधानम् । इति शब्दरत्नावली ॥

उपधिः, पुं, (उपधीयते आरोप्यतेऽनेन । उप + धा + किः ।) कपटः । इत्यमरः ॥ (यथा, मनुः ८।१६५ ॥
"योगाधमनविक्रीतं योगदानप्रतिग्रहम् ।
यत्र वाप्युपधिं पश्येत् तत्सर्व्वं विनिवर्त्तयेत्" ॥
"अरिषु हि विजयार्थिनः क्षितीशाः
विदधति सोपधि सन्धिदूषणानि" ।
इति किराते ॥१ । ४५ ।) रथचक्रम् । इति हेमचन्द्रः ॥

उपधूपितः, त्रि, (उप + धूप् + क्त ।) आसन्नमरणः । परिधूपितः । इति मेदिनी ॥

उपधृतिः, स्त्री, (उप + धृ + क्तिन् ।) किरणः । इति हेमचन्द्रः ॥

उपनतः, त्रि, (उप + नम् + क्त ।) उपस्थितः । इति हेमचन्द्रः ॥ ("अचिरोपनतां स मेदिनीं" इति रघुः ८ । ७ ॥ नम्रः । यथा, माघे । १२ । ३३ ।
"शौरेः प्रतापोपनतैरितस्ततः
समागतैः प्रश्रयनम्रमूर्त्तिभिः" ॥)

उपनदं, } क्ली, नद्याः समीपम् । इति मुग्धबोध-
उपनदि, } व्याकरणम् ॥ (तथा पाणिनीये ।
"नदीपौर्णमास्याग्रहायणीभ्यः" । ५ । ४ । ११० ।
इत्यनेन सिद्धम् ॥)

उपनयः, पुं, (उप समीपे नीयते येन कर्म्मणा । उप + नी + अच् ।) उपनयनम् । इति हेमचन्द्रः ॥
("गृह्योक्तकर्म्मणा येन समीपं नीयते गुरोः ।
बालो वेदाय तद्योगात् बालस्योपनयं विदुः" ॥
इति स्मृतिः । भावे + अच् । प्रापणम् । यथा, महाभारते ३ । २ । २४ ।
"मानसस्य प्रियाख्यानैः सम्भोगोपनयैस्तथा" ॥
न्यायमते यो यो धूमवान् स वह्निमान् अयमपि तथेत्यादिरूपः न्यायावयवभेदः ॥)

उपनयनं, क्ली, (अध्ययनार्थं आचार्य्यस्य उप समीपं नीयते येन कर्म्मणा इति । उप + नी ल्युट् ।) ब्राह्मणक्षत्रियवैश्यानां यज्ञसूत्रधारणादिरूपप्रधानसंस्कारः । अध्यापनार्थमाचार्य्यसमीपं नीयते येन कर्म्मणा तदुपनयनम् । यथा स्मृतिः ।
"गृह्योक्तकर्म्मणा येन समीपं नीयते गुरोः ।